दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-228 | 1 | जून 10, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् अधिकज्येष्ठकृष्णदशमी
ज्येष्ठ 27 प्रविष्टांशः मङ्गलमयः भवेत्


2 सेवारतशिक्षकाणां सीबीएसई-विद्यालयेषु समायोजनाय दशसहस्राधिकं स्थानान्तरणं भविष्यति

3 शिमलायां मालरोड-क्षेत्रे महानाट्यां एकत्र ३२० महिलाः अनृत्यन्, नशामुक्तेः प्रदत्तः दृढः सन्देशः

5 प्रधानमन्त्री मोदी भारतस्य दीर्घतमावधिं यावत् सेवां कृतवान् निर्वाचितः प्रधानमन्त्री जातः


## पाकिस्तान-अधिकृत-कश्मीरे हिंसा



हिमसंस्कृतवार्ता। पाकिस्तान्-अधिकृत-कश्मीर प्रदर्शनकारीणां सुरक्षासेनाभिस्सह सञ्जातेषु सङ्घर्षेषु त्रिंशत्तोऽधिकाः जनाः मृताः, प्रायः द्विशतजनाश्च व्रणिताः अभवन्।

## भारतम् संयुक्तराष्ट्रसङ्घस्य सुरक्षापरिषदि पाकिस्तानस्य निन्दाम् अकरोत्



हिमसंस्कृतवार्ता। पाकिस्तानस्य भारतं प्रति चिरस्थायी शत्रुत्वं संवर्धयितुं धार्मिक-कुपरिभाषायाः उपयोगेन नागरिकाणां मध्ये द्वेष-अभिवर्धात्मिकस्य सङ्घटितकर्मागारस्य सञ्चालनं कुर्वन् अस्तीति दृढतया निन्दाम् अकरोत्। संयुक्तराष्ट्रसङ्घस्य सुरक्षा-परिषदः सत्रे भाषमाणः संयुक्तराष्ट्रसङ्घ भारतस्य स्थायीप्रतिनिधिः पर्वथानेनी हरीशः, पाकिस्तानदेशं स्वक्षेत्रस्य अन्तः कार्यं कुर्वन्ति उग्रवादि-सङ्घटनानि फ़िल्ला-अल्-हिन्दुस्तान् इति लक्ष्यीकृत्य राष्ट्र-प्रायोजित-दुष्प्रचारस्य प्रचारम् अकरोदिति निन्दाम् अकरोत्।

## इरान्-इजरायल-देशयोर्मध्ये तीव्रयुद्धानन्तरं एशियामहाद्वीपे चिन्तायाः स्थितिः दुर्बला

इरान्-इजरायल-देशयोर्मध्ये तीव्रयुद्धानन्तरं सञ्जातेन युद्धविरामेण सम्पूर्ण पश्चिम एशियादेशे चिन्तायाः स्थितिः दुर्बला दृश्यते। यद्यपि प्रत्यक्षतया प्रक्षेपास्त्राणां आदान-प्रदानानि मन्दीभूतानि सन्तीति कथ्यते तथापि उभयपक्षौ उच्च-सैन्य-जागरूकतायां तिष्ठतः, अधिकारिणश्च स्थितिम् अस्थिरैव अस्तीति पूर्वसूचनाम् ददति।

## राष्ट्र-प्रथमस्य भावनया, सर्वकारः विश्वासाय, विकासाय, जनकल्याणाय च समर्पितः - प्रधानमन्त्री



प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् विगत-द्वादशवर्षेषु देशस्य यूनां, महिलानां, कृषकाणाञ्च सशक्तिकरणे सर्वकारः किमपि न अत्यजत्। सामाजिक-प्रसार माध्यमे श्रीमोदी अवदत् यत् चत्वारिंशदधिकैकशत-कोटि- नागरिकाणां आशीर्वचोभिः, राष्ट्र-प्रथमस्य भावनया च, सर्वकारः विश्वासाय, विकासाय, जनकल्याणाय च समर्पितः अस्ति। एतेषां अथकप्रयासानां परिणामतः देशः वैश्विकस्तरे मूलसौकर्यात् आरभ्य डिजिटल्-क्रान्तीति पर्यन्तं नूतनं परिचयम् अवाप्नोदिति प्रधानमन्त्री अवोचत्। विकसितभारतस्य संकल्पं साधयितुं सर्वकारः सेवायाः, सुशासनस्य, समृद्धेः च मार्गे अविरामं अग्रे गमिष्यतीति श्रीमोदी अधोरेखितवान्।

## गत द्वादशवर्षेषु देशस्य विदेशनीतौ महत्त्वपूर्णपरिवर्तनम् अभवदिति-विदेशमन्त्री



विदेशमन्त्री डा. एस. जयशङ्करः अवदत् यत् गत द्वादशवर्षेषु देशस्य विदेशनीतौ महत्त्वपूर्णपरिवर्तनम् अभवदिति। सामाजिक-प्रसारमाध्यमे तेनोक्तं यत् अस्मिन् कालावधी सर्वकारः सामान्य-नागरिकेभ्यः निर्गमनं, प्रलेखादीनां सत्यापनादीनि सौकरकार्याणि अविराम-तया कृतवान्, नागरिकेभ्यः पूर्णसमर्थनञ्च प्राददात्। सः अवदत् यत् सर्वकारेण भारतीयनागरिकाणां वैश्विक कार्यस्थले प्रवेशः सुलभः कारितः, विदेशेषु विपणि-प्रवेशावाप्तुं भारतीयव्यवसायिनाञ्च समर्थनं कृतम्। सः अवदत् यत्, भारतीयानां आवश्यकतां पूरयितुं चतुश्चत्वारिंशद् दूतावासाः वाणिज्य-दूतावासाश्च उद्घाटिताः। डा. जयशङ्करः अवदत् यत् सर्वकारस्य एतैः प्रयत्नैः भारतीयाः पूर्ण- आत्मविश्वासेन, दृढतया, गर्वेण च विदेशयात्रां कर्तुं समर्थाः अभवन्निति।

## प्रधानमन्त्री नरेन्द्रमोदी दूरभाषद्वारा कुवैत आमीर इत्यनेन सह पश्चिम-एशियायाः विकसितां सुरक्षा-स्थितिं चर्चितवान्



हिमसंस्कृतवार्ता। प्रधानमन्त्री नरेन्द्रमोदी कुवैत-देशस्य प्रमुखेण शेख-मेशाल-अल- अहमद-अल-जाबेर-अल-सबाह इत्यनेन सार्धं दूरभाषे संवादम् अकरोत्। उभौ नेतारौ पश्चिम एशियायां परिवर्तित-सुरक्षा-परिस्थितिं आलक्ष्य परस्परं विचार-विनिमयं कृतवन्तौ। प्रधानमन्त्रिणा क्षेत्रे विवर्धित तनावपूर्ण-विषये गम्भीरा चिन्ता प्रकटिता तथा च कुवैतस्य सार्वभौमिक-प्रादेशिक-अखंडतां विरुध्य विहित-आक्रमणान् प्रति भारतस्य प्रतिज्ञा पुनः प्रतिपादिता। असौ शान्तेः स्थैर्यस्य च पुनः स्थापनार्थं तनावं न्यूनीकर्तुं, संवादं पारस्परिक सहभागितां च दृढयितुं पुनरपि आवाहनम् अकरोत्।

## सुभाषितम्

**कलिः शयानो भवति,**
**संजिहानस्तु द्वापरः।**
**उत्तिष्ठंस्त्रेता भवति,**
**कृतं संपद्यते चरन्॥**

अर्थात्- अर्थात्- जो मनुष्य सोया रहता है, उसका भाग्य कलयुग (अंधकार) बन जाता है। जो उठकर बैठता है, वह द्वापर युग में पहुँचता है। जो खड़ा हो जाता है, वह त्रेतायुग जैसा श्रेष्ठ बनता है, लेकिन जो निरंतर आगे बढ़ता रहता है, उसका जीवन सतयुग (स्वर्ण युग) बन जाता है। इसलिए सदैव चलते रहना चाहिए, आगे बढ़ते रहना चाहिए।


हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## भारतीय-ऋतुविज्ञानविभागेन दक्षिणपूर्वोत्तरभागेषु गुरुवासरं यावत् अविवृष्टेः अनुमानम् अभिव्यक्तम्

भारतीय-ऋतुविज्ञानविभागेन कर्णाटके, अरूणाचलप्रदेश, असम, मेघालये च गुरुवासरं यावत् अविवृष्टेः अनुमानम् अभिव्यक्तम्। कर्णाटकस्य केषुचित् भागेषु, केरले, माहे प्रदेशे च रक्त संचेतना प्रसारिता। दिल्ली हरियाणा, चण्डीगढ, पञ्जाब, हिमाचल प्रदेश, जम्मू-कश्मीर, लद्दाख, उत्तरप्रदेश, विदर्भ, पश्चिम-राजस्थाने च ऊष्ण-तरङ्गाणां प्रबल-संभावना प्रकाशितास्ति।

# सेवारतशिक्षकाणां सीबीएसई-विद्यालयेषु समायोजनाय दशसहस्राधिकं स्थानान्तरणं भविष्यति




**हिमसंस्कृतवार्ताः- शिमला ।** हिमाचलप्रदेशस्य १५८ सर्वकारीय-सीबीएसई- विद्यालयानां कृते प्रस्तावितं ५,६२३ सेवारतशिक्षकाणां समायोजनं (एडजस्टमेंट) अधुना शिक्षाविभागस्य कृते एका महती प्रशासनिक- चुनौती संजाता। यदि एतेषु पदेषु चयनिताः शिक्षकाः सीबीएसई-विद्यालयेषु समायोज्यन्ते, तर्हि अस्य प्रभावेण समग्रप्रदेशे दशसहस्राधिकं स्थानान्तरणं करणीयं भवेत्। एतदेव कारणं वर्तते यत् सर्वकारः नवीननियुक्तीनां अथवा समायोजनस्य प्रक्रियायां महत्या सावधानतया अग्रे गच्छति, एषः विषयः च मन्त्रिमण्डलस्तरं यावत् प्राप्तः अस्ति। सर्वकारेण गठिता चतुःसदस्यात्मिका मन्त्रिमण्डलीयसमितिः अस्मिन् विषये मन्थनं करिष्यति।

## समितेः पुरतः एषा अस्ति महती चुनौती

समितेः पुरतः महती चुनौती एषा अस्ति यत् सीबीएसई-विद्यालयेषु शिक्षकाणां नियुक्तिकाल राज्यबोर्ड-विद्यालयेषु शिक्षकाणां न्यूनाता न भवेत्, कस्यापि क्षेत्रस्य शैक्षणिकव्यवस्था च प्रभाविता न भवेत्। विभागाधिकारिणाम् अनुसारं यदि बृहत्स्तरे शिक्षकाः सीबीएसई-विद्यालयेषु प्रेष्यन्ते, तर्हि पूर्वमेव नियुक्ताः शिक्षकाः परिवर्तनीयाः भविष्यन्ति। अस्य परिणामरूपेण एकेन स्थानान्तरणेन सह अन्यानां बहूनां स्थानान्तरणानां शृङ्खला आरब्धा भवितुं शक्नोति। अधिकारिणाम् आकलनम् अस्ति यत् एषा सङ्ख्या दशसहस्रम् अपि पारं कर्तुं शक्नोति। शिक्षाविभागे एषा अपि चर्चा अस्ति यत् सर्वकारः सम्प्रति बृहत्स्तरे सेवारतशिक्षकाणां परिवर्तनस्य स्थाने साक्षात् आगच्छताम् शिक्षकाणाम् एव नियुक्तिं कुर्यात्।

## राजनीतिकदृष्ट्या अपि विषयः संवेदनशीलः

अपरपक्षे, एषः विषयः राजनीतिकदृष्ट्या अपि संवेदनशीलः मन्यते। अधिकांशतः सर्वकारीय- सीबीएसई- विद्यालयाः प्रदेशस्य प्रमुखेषु नगरीय-अर्धनगरीयक्षेत्रेषु स्थिताः सन्ति। एतेषु विद्यालयेषु बहवः शिक्षकाः प्रभावशालिनः सन्ति, यान् मुख्यक्षेत्रेभ्यः दूरे प्रेषणम् अपि सर्वकारस्य कृते सुकरं नास्ति। यदि एते शिक्षकाः कस्मिंश्चित् समीपस्थे विद्यालये प्रेष्यन्ते, तर्हि तत्र नियुक्ताः शिक्षकाः परिवर्तनीयाः भविष्यन्ति। ईदृश्यां स्थितौ शिक्षकाणां नियुक्तिं प्रति विविधेषु स्तरेषु प्रभावः अपेक्षाः च वर्तते। एतदेव कारणं यत् सर्वकारः तादृशं किमपि निर्णयं कर्तुं न इच्छति येन कस्मिंश्चित् क्षेत्रे असन्तोषः भवेत्। अतः एव अन्तिमनिर्णयात् पूर्वं सर्वेषां सम्भावितप्रभावाणां विस्तृतम् अध्ययनं क्रियमाणं वर्तते। अस्य कृते एव उपमुख्यमन्त्रिणः अध्यक्षते एका समितिः गठनम् कृता अस्ति।

## पुरातनस्थानान्तरणानाम् अभिलेखः अपि याचितः-

मन्त्रिमण्डलीयसमित्या सीबीएसई-विद्यालयेषु सेवारतशिक्षकाणां स्थानान्तरणानां नियुक्तिकरणस्य च अभिलेखः अपि याचितः। समितिः एतत् ज्ञातुम् इच्छति यत् कैः मानदण्डैः पूर्वं शिक्षकाः एतेषु विद्यालयेषु प्रेषिताः आसन्, वर्तमानव्यवस्थायां च केषां सुधाराणाम् आवश्यकता अस्ति। एतदतिरिच्य विविधविषयेषु शिक्षकाणाम् उपलब्धता, विद्यालयवारम् आवश्यकता, छात्रसङ्ख्या, भौगोलिकपरिस्थितीनां च विश्लेषणम् अपि क्रियमाणं वर्तते, येन भविष्यत्कालीना नीतिः अधिका सन्तुलिता पारदर्शिनी च भवितुं शक्नुयात्।

## सीबीएसई-विद्यालयेषु शीघ्रमेव नियुक्ताः भविष्यन्ति शिक्षकाः

"सीबीएसई- विद्यालयेषु केन प्रकारेण सेवारतशिक्षकाणां नियुक्तिः करणीया, एतत् मन्त्रिमण्डलीयसमितेः अनुशंसासु निर्भरं भविष्यति। सीबीएसई-विद्यालयेषु शिक्षकाणां नियुक्त्याः निर्णयः शीघ्रमेव ग्राहिष्यते। साक्षात्-नियुक्ति-प्रक्रियायाम् अपि चयनायोगः तीव्रगतिम् आनेतुं कथितः अस्ति।"

**- रोहित ठाकुरः,**
**शिक्षा मन्त्री, हिमाचलप्रदेशसर्वकारः।**

# झारखण्डराज्यं भगवान् बिरसा मुण्डा इत्यस्मै तस्य पुण्यतिथौ श्रद्धाञ्जलिम् अर्पितवान्



झारखण्डराज्यं, देशस्य शेषभागेन सह, गतदिने स्वातन्त्र्ययोद्धाय "धरती आबा" भगवान् बिर्सा मुण्डा इत्यस्मै तस्य पुण्यतिथौ श्रद्धाञ्जलिम् अर्पितवान्। भारतस्य स्वातन्त्र्य-सङ्घर्षस्य इतिहासे एकं नाम अस्ति यो हि जल-वन-धरायाः रक्षणार्थं ब्रिटिश्-शासनस्य आधारम् उद्वेलयत्। केवलं पञ्चविंशतितमे वयसि राष्ट्राय स्वप्राणान् समर्पयन् भगवान् बिरसा मुण्डा ऐतिहासिकस्य उल्गुलान्-आन्दोलनस्य नेतृत्वं कृतवान्। सः न केवलं आङ्ग्लीयानां दमनकारीणां विधानानां विरोधं कृतवान् अपितु बलात् धर्मान्तरणस्य, प्राशासनिक शोषणस्य च विरुद्धम् अपि स्वध्वनिम् उत्थापयत्। सः जनजातीयसमुदायं ऐक्यीकृत्य तेषां सांस्कृतिकपरम्परायाः, अधिकाराणाञ्च रक्षणाय प्रेरितवान्। अद्य प्रातः कालात् आरभ्य राँची-नगरस्य कोकर्-समाधि-स्थले, बिर्सा-चौक् इत्यत्र च बहुसङ्ख्यकाः जनाः श्रद्धाञ्जलिं दातुं समागच्छन्तः सन्तीति सूच्यते ।

# मध्यप्रदेशस्य इन्दौर-नगरे ब्रिक्स-कृषि सम्मेलनं प्रारब्धम्



प्रधानमन्त्री-सुरक्षा-मातृत्व अभियानस्य दशवर्षपूर्ति स्मरन्, महिला-बालविकासमन्त्री अन्नपूर्णा देवी गतदिने उक्तवती यत् प्रत्येकः नवजीवनः मातुः गर्भात् आरभ्यते, गर्भावस्थायाः प्रत्येक चरणे सह सुरक्षितस्य, स्वस्थस्य, आदरयुक्तस्य च परिचर्यायाः अधिकारोऽपि धत्ते। सामाजिक-प्रसार माध्यमे, सा अकथयत् यत् विगतदशके, लक्षोपलक्ष-गर्भिणी-महिलानां समयोचित-स्वास्थ्य-परीक्षणानि, विशेषज्ञानां, परामर्शानि, उन्नत-मातृ-स्वास्थ्य-सेवाश्च प्रदानोपक्रमः सुरक्षित मातृत्वं जन-आन्दोलनम् अकरोदिति। सा अकथयत्, एषा न केवलं योजना अस्ति, अपितु प्रत्येकं मात्रे, तस्याः गर्भस्थशिशवे च स्वस्थ भविष्याय सर्वकारस्य प्रतिबद्धता वर्तते।

# प्रत्येकः नवजीवनः मातुः गर्भात् आरभ्यते- महिला-बालविकासमन्त्री अन्नपूर्णा देवी



**हिमसंस्कृतवार्ता।** मध्यप्रदेशस्य इन्दौर-नगरे ब्रिक्स-कृषि सम्मेलनं प्रारब्धम्। सम्मेलनेऽस्मिन् ब्राजील-इण्डोनेशिया-दक्षिणाफ्रिका-संयुक्त-अरीब-अमीरात अन्येभ्यः सदस्यराष्ट्रेभ्यः प्रतिनिधयः सहभागित्वं कुर्वन्ति। एकविंशतिदेशेभ्यः कृषिमन्त्रिणः, वरिष्ठाधिकारिणः, विशेषज्ञाश्च समाविष्टाः सन्ति। अद्य बहूनि सत्राणि समायोजितानि। यथा खाद्यसुरक्षा, कृषि-नवोन्मेषः, पर्यावरणानुकूल-कृषिः, कृषि-वाणिज्यम्, लघुकृषकाणां सशक्तीकरणं इत्यादयः विषयाः विचार्यन्ते। शुक्रवासरे कृषिमन्त्रिणा अपि विशिष्टः संवादः स्थापितः। अत्रापि महिलानां, युवजनानां, विषये चर्चा जाता। शनिवासरे ब्रिक्स-राष्ट्रणां मन्त्रिस्तरीया सभा अपि भविष्यति।

# मार्ग परिवहनः राजमार्ग-मन्त्री नितिन-गडकरी वर्यः लद्दाखे-मिनिमार्ग-प्रदेशे मुख्यस्य जोजिला-सुरङ्गस्य अन्तिमं कार्यं सम्पाद्य सम्पन्नं कृतवान्



**हिमसंस्कृतवार्ता।** कश्मीरोपत्यकायाः लद्दाख जोजिला-सुरंग-परियोजनया महत्वपूर्णः कीर्तिस्तम्भः अधिगतः। अनया सफलतया प्रदेशस्य च मध्ये सर्वविध-संयोजनस्य दीर्घकालिको स्वप्नः परिपूर्णताम्प्रति यास्यति। मार्ग परिवहनः राजमार्ग-मन्त्री नितिन-गडकरी वर्यः लद्दाखे-मिनिमार्ग-प्रदेशे मुख्यस्य जोजिला-सुरङ्गस्य अन्तिमं कार्यं सम्पाद्य सम्पन्नं कृतवान्। इदम् ऐतिहासिकं क्षणं विद्यते इति वर्णयन् असौ उक्तवान् यत् एषः सुरङ्गः कश्मीर-लद्दाखयोर्मध्ये यातायातः सुविधां सुनिश्चेष्यति। तेन एतदप्युक्तं यत् सुरङ्गः श्रीनगर-लेह-नगरयोः मध्ये वर्षं पर्यन्तं निर्बाध-सम्पर्कं साधयिष्यति। सामरिक गतिशीलतां, पर्यटन-विकासं, स्थानीय अर्थव्यवस्थां च प्रवर्धयिष्यति। एषः दशमलव एक-पंचोत्तर-त्रयोदश किलोमीटर दीर्घः वर्तते।

# शिमलायां मालरोड-क्षेत्रे महानाट्यां एकत्र ३२० महिलाः अनृत्यन्, नशामुक्तेः प्रदत्तः दृढः सन्देशः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य राजधान्याः शिमलायाः ऐतिहासिक- रिजमैदाने 'अन्ताराष्ट्रिय- शिमला- ग्रीष्मोत्सवस्य' द्वितीये दिने 'महानाट्याः' (विशाल- नाटी- नृत्यस्य) भव्यम् आयोजनं कृतम्। अस्मिन् कार्यक्रमे ३२० आङ्गनवाडी-कार्यकर्तृभिः सहायिकाभिश्च 'मां' (माता) इति मुख्यविषयम् अधिकृत्य महानाटी प्रस्तुता। नृत्यकाले महिलाभिः नशामुक्तेः सन्देशवाहकानि भित्तिपत्राणि, छत्रेषु अङ्किताः नारीशक्ति-सुरक्षा- नारीस्वावलम्बन- सन्देशाः प्रदर्शिताः। महिलाः पारम्परिकं 'ढाठू' वस्त्रं 'रेजटा' च धृत्वा नाटी-नृत्यम् अकुर्वन्। अस्यां महानाट्यां भागं ग्रहीतुं शिमलायाः विभिन्नेभ्यः आई. सी. डी. एस. केन्द्रेभ्यः आंगनबाड़ी-कर्मचारिण्यः प्राप्ताः आसन्। अस्मिन् अवसरे मालरोडक्षेत्रे पर्यटकाणां स्थानीयलोकानां च महान् सम्मर्दः उपस्थित आसीत्। अनेकैः पर्यटकैः अपि महिलाभिः सह नाटी-नृत्यस्य आनन्दः गृहीतः। कार्यक्रमे शिमलाजनपदस्य उपायुक्तः अनुपम कश्यपः मुख्यतिथिरूपेण उपस्थितः आसीत्। एतेन साकं कार्यक्रमस्य आयोजिका, महिला एवं बाल विकास विभागस्य जनपद-कार्यक्रम-अधिकारिणी ममता पॉल अन्याः च अधिकारिणः उपस्थिताः आसन्।

### शिमला-ग्रीष्मोत्सवे प्रथमतया अभवत् 'मलखम्ब' क्रीडायाः श्लाघनीया प्रस्तुतिः

शिमला- अन्तर्राष्ट्रिय- ग्रीष्मोत्सवे प्रथमतया 'करुणा भारती' संस्थायाः कलाकारैः 'मलखम्ब' क्रीडायाः सुदृढा प्रस्तुतिः दत्ता। शिमला-उत्सवे एषः प्रयोगः प्रथमवारं विहितः। अस्यां क्रीडायां क्रीडकानां कौशलेन अद्भुतकौशलैश्च दर्शकाणां भूरि प्रशंसा प्राप्ता। दलस्य संयोजकेन सञ्जयसूदेन संसूचितं यत् हिमाचलप्रदेशे अस्मात् पूर्वं मण्ड्यां मलखम्ब- क्रीडायाः प्रदर्शनं कृतम् आसीत्, शिमला-ग्रीष्मोत्सवे तु अयम् आद्यः अवसरः वर्तते। तेन कथितं यत् गते दिने यदा तैः मालरोड-उपरि एषा प्रस्तुतिः दत्ता, तदा जनानां भृशं सहयोगः लब्धः। सः अवदत् यत् मलखम्ब-क्रीडा भारतीय- संस्कृत्या सम्बद्धा एका पौराणिकी क्रीडा अस्ति। भारते एषा क्रीडा रामायण-महाभारतकालादेव क्रीड्यते। कश्चित् समयः आसीत् यदा एषा विलोपस्य कङ्काले आसीत्, किन्तु अधुना देशे अस्यै क्रीडायै प्रवर्धनं दीयते। तेन सर्वकारात् आग्रहमपि कृतं यत् राज्यसर्वकारः प्रदेशे मलखम्ब-क्रीडायाः विकासाय उचितं स्थानं व्यवस्थापयेत्। यदि उचितं साहाय्यं प्राप्स्यते, तर्हि मलखम्बे राष्ट्रीय-अन्ताराष्ट्रियस्तरीयाः क्रीडकाः सज्जाः भवितुं शक्नुवन्ति, ये ओलिम्पिक-क्रीडासु पदकं जित्वा हिमाचलस्य नाम विश्वस्मिन् प्रदीप्तं करिष्यन्ति।

# रिवालसरक्षेत्रे मर्कटः श्वानशावकं नीत्वा वृक्षोपरि उपविष्टः; सामाजिकमाध्यमेषु दृश्यं वेगेन प्रसृतम्



**हिमसंस्कृतवार्ताः- मण्डी।** मण्डी-जनपदस्य प्रसिद्ध-धार्मिक-पर्यटनस्थलात् 'रिवालसरतः' एकं विस्मयोत्पादकं दृश्यं सामाजिकमाध्यमेषु तीव्रगत्या प्रसृतं संजातम्। प्रायः एकनिमेष-सप्तदशक्षणयोः अस्मिन् दृश्ये एकः मर्कटः (वानरः) श्वानस्य एकं लघुशावकं स्वक्रोडे निधाय वृक्षोपरि उपविष्टः संदृश्यते। दृश्यस्य सम्मुखम् आगमनात् परं एषः विषयः क्षेत्रे विमर्शस्य केन्द्रः संजातः, जनेषु च लघुबालकानां सुरक्षां प्रति चिन्ता अपि वर्धिता। सूचनानुसारम् एतत् दृश्यं रिवालसर-नगरस्य कथ्यते, प्रायः त्रि- चतुर्दिनेभ्यः पूर्वतनं च वर्तते। दृश्ये स्पष्टं वीक्षितुं शक्यते यत् एकः मर्कटः श्वानशावकं नीत्वा वृक्षोपरि आरूढः। आश्चर्यस्य विषयः अयम् आसीत् यत् मर्कटस्य क्रोडे उपविष्टः श्वानशावकः पूर्णतः शान्तः अतीव निभृतश्च दृश्यते स्म। स्थानीयानाम् अनुसारं एषः सम्पूर्णः घटनाक्रमः प्रायः दशनिमेषान् यावत् चलितवान्।

स्थानीयनिवासी अजय सूर्या महोदयः अवदत् यत् एतत् दृश्यं कतिपयदिवसेभ्यः पूर्वतनं वर्तते। तेन प्रकथितं यत् यं श्वानशावकं मर्कटः उत्थापितवान् आसीत्, सः कस्यापि पालितः नासीत्, अपितु कश्चित् भ्रमणशीलः श्वानशावकः आसीत्। मर्कटः प्रायः दशनिमेषान् यावत् तं स्वक्रोडे स्थापितवान्, ततः परं च किमपि हानिं विना तं त्यक्तवान्। यद्यपि अस्मिन् अन्तराले काऽपि अप्रिया घटना न घटिता, तथापि एतत् दृश्यं दृष्ट्वा जनेषु व्याकुलता वर्धिता अस्ति। स्थानीयलोकानां प्रकथनं वर्तते यत् यदि मर्कटः अनेन प्रकारेण लघुपशून् उत्थापयितुं शक्नोति, तर्हि बालकान् प्रति अपि सजगतायाः महती आवश्यकता वर्तते। रिवालसरे तस्य समीपवर्तिषु क्षेत्रेषु च मर्कटानां सङ्ख्या निरन्तरं वर्धमाना अस्ति, येन कारणेन जनाः प्रायः समस्यानां सम्मुखीकुर्वन्ति। सम्प्रति एतत् दृश्यं सामाजिकमाध्यमेषु तीव्रतया अग्रेक्रियते, जनाश्च एतदधिकृत्य विविधाः प्रतिक्रियाः यच्छन्ति। अपरपक्षे स्थानीयनागरिकाः प्रशासनात् मर्कटानां वर्धमानासु गतिविधिषु ध्यानं दातुम् आग्रहमपि कुर्वन्तः सन्ति।

# प्रधानमन्त्रिणा नरेन्द्रमोदिना सह उपवेशनं करिष्यति मुख्यमन्त्री सुक्खुः, नीति-आयोगस्य शासकीयपरिषदि उत्थापयिष्यति हिमाचलसम्बद्धान् चतुर्विषयान्

**हिमसंस्कृतवार्ताः- शिमला।** प्रधानमन्त्रिणः नरेन्द्रमोदिनः अध्यक्षतायाम् आयोज्यमानस्य शासकीयपरिषदः उपवेशनार्थं मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः देहलीं गच्छन् अस्ति। नीति-आयोगेन सर्वैः मुख्यमन्त्रिभिः साकं ११ जून दिनाङ्के उपवेशनं प्रेषितम्। मुख्यमन्त्रिणा सह मुख्यसचिवः अपि देहलीं प्रस्थितवान् अस्ति। अस्मिन् उपवेशने देशस्य सर्वेषां राज्यानां मुख्यमन्त्रिणः, केन्द्रशासितप्रदेशानाम् उपराज्यपालाः, केन्द्रसर्वकारस्य वरिष्ठाः अधिकारिणश्च भागं ग्रहीष्यन्ति। निर्धारित-कार्यसूच्याः अनुसारम् अस्मिन् उपवेशने मानवसंसाधनविकासः, शिक्षा, कौशलविकासः, आजीविकासृजनम्, उद्यमितायाः प्रवर्धनम् इत्यादिषु विषयेषु विशेषविमर्शस्य सम्भावना वर्तते। एतदतिरिच्य राज्यानां विकासाग्रताः, केन्द्र- राज्ययोः मध्ये उत्तमसमन्वयः, सहकारी- सङ्घवादस्य सुदृढीकरणं च इत्यादयः विषयाः अपि कार्यसूच्यां सम्मिलिताः सन्ति। उपवेशने उद्योगाणाम् आवश्यकतानुसारं कुशल- मानवसंसाधनस्य निर्माणं, युवभ्यः जीविकायाः नूतनावसराणां सृजनं, शिक्षा-प्रशिक्षणव्यवस्थयोः अधिकप्रभावशालित्वं च प्रति विचारविमर्शः भवितुम् आशा वर्तते। अनेन साकमेव स्वच्छ- ऊर्जा, नवोन्मेषः (नवाचारः), आत्मनिर्भरभारतस्य लक्ष्याणि च अग्रे नेतुं राज्यानां भूमिकायाः उपरि चर्चा भवितुं शक्नोति। नीति-आयोगस्य शासकीयपरिषद् केन्द्र-राज्यानां मध्ये नीतेः समन्वयस्य सर्वोच्चो मञ्चः मन्यते। अस्मिन् उपवेशने विभिन्नानि राज्यानि स्वकीय- विकाससम्बद्धान् विषयान् परामर्शान् च उपस्थापयिष्यन्ति, येषाम् आधारेण राष्ट्रीयस्तरे नीतिगतदिशां निश्चितं कर्तुं साहाय्यं प्राप्स्यते।

### आर.डी.जी., जी.एस.टी. विपद्, ग्रीन-बोनस इत्यादिषु भविष्यति सम्भाषणम्-

यतोहि नीति-आयोगः नीतिनिर्धारिका संस्था वर्तते, अतः मुख्यमन्त्री सुक्खु-महोदयः अस्मिन् राज्यस्य चतुर्प्रमुखान् विषयान् उत्थापयितुं शक्नोति। एतेषु आर.डी.जी. ( राजस्व- हानि- अनुदानम्) स्थगनेन हिमाचलस्य जातस्य हानेः पूरणम्, जी.एस.टी. कारणतः राज्यस्य जायमानायाः क्षतेः क्षतिपूर्तिः, प्राकृतिकविपद्भिः सह सङ्घर्षार्थं साहाय्यराशेः प्रभावशालिनी व्यावहारिकी च व्यवस्था इति विषयेषु सम्भाषणं भविष्यति। मुख्यमन्त्री हिमाचलस्य पक्षतः बहुवारम् उत्थाप्यमानस्य हरित- लाभांशस्य विषयमपि प्रस्थापयितुं शक्नोति। अतः पूर्वमपि राज्यसर्वकारेण वनानां रक्षणस्य विनिमये एषा एव अभ्यर्थना वित्तायोगस्य सम्मुखम् अपि प्रस्थापिता आसीत्।

# होर्मुज-जलमार्गे अमेरिका-देशाय तीव्रः आघातः, अपाचे-हेलिकॉप्टर-विमानं दुर्घटनाग्रस्तम्

वाशिंगटनम्। पश्चिम-एशिया-क्षेत्रे वर्तमानेन तनावेन सह अमेरिका-देशाय कश्चन महान् आघातः प्राप्तः अस्ति। सूचना प्राप्ता यत् होर्मुज-जलमार्गस्य समीपे अमेरिकादेशस्य सैन्य-हेलिकॉप्टर-'अपाचे'-विमानं दुर्घटनाग्रस्तं (क्रैश) जातम्। तथापि चालकद्वयं (द्वौ पायलटौ) सुरक्षितं बहिः निष्कासितम्। अपाचे-हेलिकॉप्टर-विमानस्य एषा दुर्घटना केवलं कश्चित् सयोगः अस्ति उत कस्यापि सुचिन्तिता योजना, इति विषये अधुना यावत् किमपि ज्ञातं नाभवत्।'न्यूयार्क टाइम्स' इत्यस्य एकस्य विवरणस्य (रिपोर्ट) अनुसारं, दुर्घटनायाः अव्यवहितोत्तरमेव उद्धारकार्यं (रेस्क्यू ऑपरेशन) आरब्धम्,



चालकद्वयं च सुरक्षितं बहिः आनीतम्। उल्लेखनीयं यत् इयं दुर्घटना तादृशे समये घटिता, यदा इजरायल-ईरान-देशयोः मध्ये पुनः युद्धं प्रवृत्तम् अस्ति। ईरान-इजरायल-देशयोः मध्ये निरन्तरं आक्रमणानि भवन्ति, क्षेत्रे च परिस्थितिः अतीव संवेदनशीला वर्तते।

# मन्त्रिणः नीतीशमिश्रस्य महती घोषणा; वैश्विक- विहारिणाम् विकासाय कल्पितः अभिनव- डिजिटलमञ्चः




- **"वैश्विकसञ्जालम्, स्थानीयविकासः": मन्त्रिणा नीतीशमिश्रेण उद्घाटितं विशेष-पोर्टल**
- **विकसित-बिहार-निर्माणे वैश्विकविहारिणः सहायीभवन्तु- सूचनाप्रौद्योगिकीमन्त्री नीतीशमिश्रः**

हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्
विहार-सर्वकारस्य सूचना-प्रौद्योगिकी-विभागेन विश्वस्मिन् जगति निवसतं विहार-मूल-जनानां राज्यस्य विकासेन, नवोन्मेषेण, निवेशेन तथा च तकनीकी-प्रगत्या सह सम्बद्धीकरणस्य उद्देश्येन एकः विशिष्ट-अङ्कीयमञ्चः (doit.bihar.gov.in) विकसितः।

अस्मिन् मङ्गलमय-अवसरे सूचना- प्रौद्योगिकी- विभागस्य माननीय-मन्त्रिचरैः नीतीश मिश्रमहोदयैः विभागीय-जालपुटकस्य विधिवत् उद्घाटनं कृतम्। अस्मिन् कार्यक्रमे विभागस्य सचिववर्याः अभयकुमार सिंहमहोदयाः अपि उपस्थिताः आसन्।

मन्त्रिचरैः नीतीश मिश्रवर्येण स्वकीय-उद्बोधने प्रतिपादितं यत् विहारस्य प्रज्ञावन्तः प्रतिभाशालिनश्च जनाः अद्य जगति विभिन्न-देशेषु महत्त्वपूर्णं योगदानं कुर्वन्तः सन्ति। तेषाम् विशेषज्ञतायाः, अनुभवस्य, निवेश-क्षमतायाश्च राज्यस्य प्रगत्या सह योजनं सामयिकम् अनिवार्यं च वर्तते। अनेन डिजिटलमञ्चेण वैश्विक- विहारिणाम् अयं समुदायः साक्षात् राज्य- सर्वकारेण सह सम्बद्धः भूत्वा स्व-परामर्शान्, सहयोगात्मक-प्रस्तावान्, स्वैच्छिक-योगदानं, निवेश- प्रारूपान् च प्रेषयितुं शक्ष्यति।

अस्मिन् जालीये मञ्चे त्रीणि प्रमुखाणि द्वाराणि कल्पितानि सन्ति- 'परिवर्तकः' (चेंज मेकर) विकास- सम्बन्धिनः परामर्शाः प्रदातुम्, 'स्वयंसेवकः' सामाजिक-अभियानेषु सक्रियं सहयोगं प्रदातुं, 'निवेशः' (इन्वेस्टमेंट) उद्योग- स्थापनायै च निवेश-प्रस्तावान् प्रस्तोतुम्।मिश्रमहोदयैः स्पष्टीकृतं यत् प्रधानमन्त्रि-नरेन्द्रमोदी-महोदयानाम् 'डिजिटल इण्डिया' इति सङ्कल्पं अग्रे नयन्ती एषा योजना 'विकसित- बिहारस्य' लक्ष्याय एका नवीना गतिः प्राप्स्यते। 'बिहार एआई शिखरसम्मेलन-२०२६' अवसरे माननीय-मुख्यमन्त्री सम्राट चौधरी-महोदयैः यः आह्वानः कृतः आसीत्, तमेव अग्रे नयन् अयं मञ्चः कल्पितः।



हिमसंस्कृतवार्ता
असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

## संस्कृतं मधुरं सदा- ४८

विद्याधनं हि मनुष्यजीवनस्य मुख्यरत्नम्, सुन्दरम् आभूषणं वा। विद्यया विना मनुष्यः आत्मानं नाभिजानाति, न वा जगत्स्वरूपं, जगत्कारणं च जानीयात्। विद्या हि सर्वं प्रकाशयति। विद्याहीनः पशुतुल्यः इति कथितमस्ति। तस्माद् विद्यासाधना मनुष्यमात्रेण कार्या। यः मनुष्यः ज्ञानरूपिणीं विद्यां, कर्मरूपिणीम् अविद्यां च तत्त्वेन जानाति, एवं वेदं यथार्थतः अवगच्छति, सः अविद्यया अर्थात् कर्मानुष्ठानेन मृत्युं तीर्त्वा विद्यया अमृतम् अश्नुते, अर्थाद् अविनाशिनम्, आनन्दमयं परब्रह्म-पुरुषोत्तमं प्रत्यक्षं प्राप्नोति। यः नानाफलाकाङ्क्षी मनुष्यः विनाशशीलानां देवपितृणाम् उपासनां करोति, सः अज्ञानरूपं घोरान्धकारं प्रविशति। एवं यः अविनाशिनः परमेश्वरस्य उपासनायां बहिर्दृष्ट्या रतः स्यात्, परं तस्य उपासनाप्रसङ्गे मिथ्याभिमानः स्यात् तर्हि सः इतोऽपि अधिकतरम् अन्धकारं प्रविशति। अविनाशिनः ब्रह्मणः उपासनया एकतरं फलं प्राप्यते, परम् विनाशशीलानां देवपितृणाम् उपासनया अन्यतरं फलं प्राप्यते इति धीरपुरुषाः मनुष्यान्, अस्मान् प्रति वा सविस्तरम् अकथयन्। यः मनुष्यः अविनाशिनं परमेश्वरम्, विनाशशीलान् देवादीन्, तथा वेदं यथार्थतः जानाति, सः तेषां देवादीनाम् उपासनया मृत्युं तरति, तथाच अविनाशिनः परमेश्वरस्य उपासनया अमृतम् अश्नुते, अर्थात् सः अविनाशिनं परब्रह्म-परमेश्वरं प्रत्यक्षं प्राप्नोति। सर्वेषां पालकः, पोषकः च परमेश्वरः हि वर्तते। सः सत्यस्वरूपः, सर्वेश्वरः, चास्ति। तस्य श्रीमुखं ज्योतिर्मयेन सूर्यमण्डलरूपपात्रेण आच्छादितम् अस्ति। परन्तु भक्तिरूपं सत्यधर्मं च अवलम्ब्य यः तम् उपासते, तस्मै भक्ताय स्वदर्शनं प्रददाति, तदावरणं परमेश्वरः स्वयम् अपसारयति। भक्तस्य कल्याणाय एव श्रीभगवान् सदैव तत्परः भवति। पूर्णसमर्पितः भक्तः भगवन्तं प्राप्नोति। मनुष्यजीवनं भगवत्प्राप्तये हि वर्तते इति।

## सगुणे निर्गुणे निराकारकारे त्वमेका विभासि प्रकारे प्रकारे

### (ईशस्य चिन्मयशक्तेरभिव्यक्तिपरा रूपसम्भारा लीलाखेलाः)

सुपुष्पे सुहास्ये कलालापपाने
पतत्रिडयने मदिरामोहने
प्रमुग्धे प्रभाते निशीथे सुघोरे
त्वमेका विभासि प्रकारे प्रकारे ।१।
गिरेरद्रिवने सुवर्णविताने
सुगन्धे प्रकीर्णे जने जने ध्याने
पयोवाहधारधारिते तुषारे
त्वमेका विभासि प्रकारे प्रकारे ।२।
समीरे हुताशे छटाभाप्रकाशे
प्रवर्षणनीरे तमिस्राविपाशे
खगैर्वा खचित्रे निशानाथकारे
त्वमेका विभासि प्रकारे प्रकारे ।३।
नदीनां प्रवाहे सरसि निर्झरे
सागरे सागरे रत्नगर्भासरे
गगने पवने ध्रुवताराकारे
त्वमेका विभासि प्रकारे प्रकारे ।४।
सुचित्रे विचित्रे इहात्र वहित्रे
सन्मित्रे द्विनेत्रे भिन्ने भिन्ने गात्रे
कलानां कलापे कलाकुले काले
त्वमेका विभासि प्रकारे प्रकारे ।५।
मृगरङ्गधावे तडागे तडागे
रङ्गे रङ्गे रागे निसर्गस्वभावे
तदा यदा मुदा कदा स्वयंवरे
त्वमेका विभासि प्रकारे प्रकारे ।६।
वादे वादे नादे मृदङ्गनिनादे
कवितासु भावे काव्यतास्वभावे
सदैव सर्वदा सर्वथाऽधिकारे
त्वमेका विभासि प्रकारे प्रकारे ।७।
त्वामहं पश्यामि यदा शिवे सत्ये
नमांसि त्वर्पये विश्वसम्भाविते
विश्वस्यापि मुदा लयतासञ्चारे
त्वमेका विभासि प्रकारे प्रकारे ।८।
सरसि सरसि स्मरेऽपि रहसि
विहङ्गविकारे सुधासारनीरे
विकचविशेषसरोरुहापारे
त्वमेका विभासि प्रकारे प्रकारे ।९।
पठने पाठने ज्ञानवितरणे
विवेकविवेके त्वपि विचारणे
ध्यायनध्यायिके प्रचरे प्रचारे
त्वमेका विभासि प्रकारे प्रकारे ।१०
वीराणां सङ्गरे रणरङ्गकारे
देशप्रेमधारे हृदयसम्भारे
त्रिरङ्गे सुरङ्गे जयाख्याप्रसारे
त्वमेका विभासि प्रकारे प्रकारे ।११
मन्दिरे मन्दिरे शङ्खे शङ्खे नादे
प्रदीपे सुगन्धे शिवस्य प्रसादे
सगुणे निर्गुणे निराकारकारे
त्वमेका विभासि प्रकारे प्रकारे
त्वमेका विभासि प्रकारे प्रकारे
त्वमेका विभासि प्रकारे प्रकारे ।१२।



**रचयिता - आचार्यः डा. रुरुकुमारमहापात्रः राष्ट्रियसंस्कृतविश्व-विद्यालयः,तिरुपतिः**

हिमसंस्कृतवार्ताः

## ।।लौकिकन्यायकोशः।।

## ।।अतीतमहिषीस्नेहन्यायः।।

एकस्य गृहस्थस्य समीपे एका महिषी आसीत्।सः तस्याम् अतीव स्निह्यति स्म। कालेन् सः गृहस्थः गृहस्थाश्रमात् वानप्रस्थाश्रमं प्रविष्टः। वानप्रस्थाश्रमे सर्वे अपि बन्धाः त्यक्तव्याः भवन्ति। परन्तु अस्य गृहस्थस्य मनसि महिषीं प्रति वर्तमानः उत्कटः स्नेहः न गतः। प्राचीनाः बन्धाः शाश्वताः भवन्ति। वयं तं बन्धं शीघ्रं विस्मर्तुं न शक्नुमः इति अनेन न्यायेन बोध्यते।

**डा. वर्षा प्रकाश टोणगांवकर, पुणे/ महाराष्ट्रम्**



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये। अद्य एका मधुरा वार्ता मया प्राप्ता। पुत्रेण चालिते आकाशविमाने यात्रां कुर्वती जननी अतीव भावविह्वला जाता।

**काव्या-** आम् नन्दिनि, एषा वार्ता मम हृदयं स्पृष्टवती अस्ति। मातुः सन्तोषः खलु स्वर्गसमानः! द्वितीया वार्ता समुद्रतटस्य अस्ति। एकेनान्तर्जाल-दृश्यस्रष्ट्रा गोवाराज्यस्य सिकतामये तटे विकीर्णानां काचखण्डानां भीतिः प्रदर्शिता। एतद् दृष्ट्वा अन्तर्जाले जनैः नागरिकबोधः प्रश्नीकृतः।

**नन्दिनी-** सत्यं वदसि काव्ये, तटे काचखण्डाः पर्यटकानां कृते अतीव भयप्रदाः सन्ति। एतादृशः नागरिकबोधस्य अभावः निन्दनीयः अस्ति। परन्तु इतरदेशेषु व्यवस्था भिन्ना अस्ति। एकेन भारतीय- दृश्यस्रष्ट्रा निवेदितं यत् जापानदेशस्य आरक्षकैः कतिपयनिमेषैः एव तस्य नष्टः धनस्यूतः प्राप्तः।

**काव्या-** अहो! जापानदेशस्य आरक्षकाणां कर्तव्यनिष्ठा खलु श्लाघनीया। अस्माकं देशे अपि एतादृशी शीघ्रता अपेक्षिता अस्ति। अन्या एका विचित्रा वार्ता अस्ति। विश्रान्तिदिनेषु लक्षवेतनं प्राप्यापि बेङ्गलूरु-नगरस्य कश्चित् तन्त्रज्ञः भाटकेन द्विचक्रिकां चालितवान् अस्ति। अनेन अन्तर्जाले महान् वादसंवादः जनितः।

**नन्दिनी-** आश्चर्यम्! केचित् जनाः केवलं धनार्थं न, अपितु लोकानुभवाय अपि कार्यं कुर्वन्ति। अयं वादः सत्यमेव विचारणीयः अस्ति। अद्य एतावदेव। पुनर्मिलामः।

## २० नूतन-औद्योगिकप्रस्तावेभ्यः स्वीकृतिः, २२ पुरातनोद्योगानां विस्तारः

# १३३५५ जनाः प्राप्स्यन्ति आजीविकावसरान्



**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशे मङ्गलवासरे सचिवालये आयोजिते राज्य-एकल-गवाक्ष-स्वीकृति-एवं-अनुश्रवण-प्राधिकरणस्य (सिंगल विण्डो) उपवेशनं मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू-महोदयस्य अध्यक्षतायाम् अभवत्, यत्र आहत्य ४२ औद्योगिकप्रस्तावेभ्यः अनुमतिः दत्ता। एतेषु १७ नूतनोद्योगानां स्थापनायाः प्रस्तावाः सन्ति तथा च २५ उद्योगानां विस्तारीकरणाय अनुमोदनं विहितम्। ५,८७७ कोटिरूप्यकाणां (५,८७७ करोड़) निवेशयुक्तानाम् एतेषां प्रस्तावानां धरातले अवतरणात् परं प्रदेशस्य प्रायः १३,३५५ जनाः आजीविकायाः अवसरान् प्राप्स्यन्ति। उपवेशने नूतन-औद्योगिकनीतिम् अधिकृत्यापि विस्तृता चर्चा संजाता। मुख्यमन्त्रिणा नूतनां नीतिं मासद्वयस्याभ्यन्तरे आनेतुं निर्देशाः प्रदापिताः। एकल-गवाक्ष-उपवेशने औषधनिर्माणं (फार्मा), ऑटोमोबाइल, वस्त्रं, रसायनं, इलेक्ट्रॉनिक्स, प्लास्टिक-पैकेजिङ्ग, खाद्यप्रसंस्करणम्, प्रसाधनसामग्री (कॉस्मेटिक्स), इष्टि (स्टील) इत्यादिभ्यः उद्योगप्रस्तावेभ्यः स्वीकृतिः वितरिता। सर्वकारस्य प्रकथनं वर्तते यत् अनेन प्रदेशस्य औद्योगिक-आधारे विविधता आगमिष्यति सन्तुलितविकासश्च गतिं प्राप्स्यति। मुख्यमन्त्रिणा प्रतिपादितं यत् राज्यसर्वकारः श्रमप्रधान-उद्योगान् प्रोत्साहयितुं विशेषं ध्यानं ददाति, येन युवभ्यः अधिकाधिकं जीविकासृजनं भवेत्। तेन अधिकारिणः निर्दिष्टाः यत् आगामि-मासद्वयस्य अन्तरे नूतना औद्योगिकनीतिः अधिसूचिता करणीया, येन प्रतिवेशीराज्यानां तुलनायाम् निवेशम् आक्रष्टुं प्रतिस्पर्धा सुदृढा भवितुं शक्नुयात्।

**औद्योगिकनिवेशस्य 'रूपान्तरण-दरः' ५७ प्रतिशत्, राष्ट्रीय-औसतात् अधिकम्**

उद्योगमन्त्री हर्षवर्धनचौहानः अवदत् यत् निवेशकानां कृते अनुकूलं वातावरणम्, सुदृढा आधारभूतसंरचना, प्रभावशालिनी एकल-गवाक्ष-प्रणाली च इति कारणैः हिमाचलप्रदेशे निवेशः वर्धमानोऽस्ति। गतेषु त्रिषु वर्षेषु प्रदेशे औद्योगिकनिवेशस्य रूपान्तरण-दरः ('कन्वर्जन-दर') ५७ प्रतिशत् अभवत्, या राष्ट्रीय-औसतस्य (३२ तः ३५ प्रतिशत्) तुलनायां भृशं अधिका वर्तते। तेन कथितं यत् सर्वकारस्य नीतयः, कुशलं व्यापारवातावरणं च उद्योगकर्म सुगमं कुर्वन्ति। अस्मिन् उपवेशने मुख्यसचिवः के.के. पन्तः, ए.सी.एस. आर.डी. नजीमः, वित्त-प्रधानसचिवः देवेशकुमारः, वित्तसचिवः अभिषेकजैनः, उद्योगविभागस्य निदेशकः यूनुसः, अतिरिक्तनिदेशकः तिलकराजशर्मा अन्ये च अधिकारिणः उपस्थिताः आसन्।

## शिमलायां मुख्यमन्त्रिणः नॉर्वे-देशस्य राजदूतया सह महत्त्वपूर्णः संवादः; हरित-ऊर्जा-पर्यटनक्षेत्रेषु निवेशाय आह्वानम्



**हिमसंस्कृतवार्ताः - शिमला।** मङ्गलवासरे राजधान्यां शिमलायाम् भारतदेशे नॉर्वे-देशस्य माननीया राजदूतः 'मे-एलिन स्टेनर' महोदया मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू-महोदयेन सह शिष्टाचारं मेलनं कृतवती। अस्मिन् अवसरे निर्माण-एवं-विध्वंस (C&D) अपशिष्टप्रबन्धनं, परिपत्र-अर्थव्यवस्था (सर्कुलर इकोनॉमी), सततपर्यटनम्, जलवायु-अनुकूल-नगरविकासः, नवीकरणीय-ऊर्जा, डिजिटल-प्रशासनं (डिजिटल गवर्नेंस) तथा च सुव्यवस्थित-नगरम् (स्मार्ट-सिटी) इत्यादिषु प्रमुखक्षेत्रेषु पारस्परिक-सहयोगस्य सम्भावनासु गम्भीरा सार्थकी च चर्चा सञ्जाता।मुख्यमन्त्रिणा प्रतिपादितं यत् हिमाचलप्रदेशः निर्माण-एवं-विध्वंस-मलिनावशेषस्य (कन्स्ट्रक्शन वेस्ट) वैज्ञानिकाधारित-प्रबन्धने तस्य पुनश्चक्रीकरणे (रिसाइक्लिंग) च नॉर्वे-देशस्य उन्नत-प्रविधीनां (तकनीक) विशेषज्ञतायाश्च पूर्णं लाभं ग्रहीष्यति। तेन राज्यस्य प्रगत्यै नॉर्वे-देशस्य विविधाः औद्योगिकी-संस्थाः हिमाचलप्रदेशे पर्यटनक्षेत्रे, हरित-ऊर्जायां तथा च भू-तापीय-ऊर्जा (जियोथर्मल एनर्जी) क्षेत्रेषु निवेशं कर्तुम् सादरेण आमन्त्रिताः। सर्वकारः निवेशकेभ्यः सर्वविधं साहाय्यं प्रदातुं कटिबद्धः अस्ति। अस्मिन् मङ्गलवासरे राज्यस्य नगरविकासमन्त्री विक्रमादित्यसिंहः, शिमला-नगरनिगमस्य महापौरः सुरेन्द्रचौहानः, राज्यस्य मुख्यसचिवः के.के. पन्तः अन्ये च प्रमुखाः गण्याः अधिकारिणः उपस्थिताः आसन्।

## केन्द्रीयमन्त्री जे.पी. नड्डा, शिक्षामन्त्री धर्मेन्द्रप्रधानश्च नीट-परीक्षासज्जानां समीक्षां कृतवन्तौ



स्वास्थ्य-एवं-परिवारकल्याणमन्त्री जगत्प्रकाशः नड्डा गतदिने शिक्षामन्त्रिणा धर्मेन्द्रप्रधानेन सह मेलनं कृत्वा जून-मासस्य २१ दिनाङ्के आयोज्यमानायाः नीट-परीक्षायाः (NEET) सज्जतायाः समीक्षां कृतवान्। स्वास्थ्यमन्त्रालयेन सामाजिकमाध्यमे (सोशल मीडिया) एकां सूचनां प्रसार्य ज्ञापितं यत्, श्रीनड्डामहोदयेन देशव्यापीपरीक्षायाः सुचारु, सुरक्षितं, निर्बाधं च सञ्चालनं सुनिश्चितं कर्तुं मन्त्रालयस्य पक्षतः पूर्णसहयोगस्य आश्वासनं दत्तम्। द्वाभ्यां मन्त्रालयाभ्यां छात्रेभ्यः क्लेशरहितम् (परेशानी मुक्त) अनुभवं प्रदातुं स्वप्रतिबद्धता पुनरुक्ता।

## आईएनएसए (INSA) इत्यनया ब्रिक्स-विज्ञानअकादमीनां एआई-मञ्चस्य प्रथमा गोष्ठी आयोजिता




भारतीयराष्ट्रीयविज्ञानअकादम्या (INSA) सततविकासार्थं कृत्रिमबुद्धिमत्ता (एआई) इति विषये ब्रिक्स-विज्ञानअकादमीनां मञ्चस्य (फोरम) प्रथमा गोष्ठी आभासीयमाध्यमेन (वर्चुअल) आयोजिता। विज्ञान-एवं-प्रौद्योगिकीमन्त्रालयेन ज्ञापितं यत्, इयं गोष्ठी 'एआई-इत्यस्य उपयोगः तथा च ग्लोबल-साउथ-सहयोगस्य सुदृढीकरणम्' इति मुख्यविषये आयोजिता आसीत्। अस्मिन् दशदेशानां – ब्राजील, चीन, मिस्र, इथियोपिया, इण्डोनेशिया, रूस, दक्षिणअफ्रीका, बेलारूस, नाइजीरिया, वियतनाम च – विज्ञानअकादमीभिः उत्तरदायित्वपूर्ण-न्यायसङ्गत-एआई-विकासार्थं एकां सहयोगात्मिकां घोषणाम् अग्रे नेतुं प्रतिभागः कृतः।

## प्रधानमन्त्री मोदी भारतस्य दीर्घतमावधिं यावत् सेवां कृतवान् निर्वाचितः प्रधानमन्त्री जातः



प्रधानमन्त्री नरेन्द्रमोदी अद्य भारतस्य इतिहासे दीर्घतमावधिं यावत् सेवां कृतवान् निर्वाचितः प्रधानमन्त्री अभवत्। श्रीमोदी २०१४ तमस्य वर्षस्य मई-मासस्य २६ दिनाङ्के प्रधानमन्त्रिणः पदस्य शपथं गृहीतवान् आसीत्। सः पण्डितजवाहरलालनेहरुवर्यस्य कीर्तिमानं (रेकॉर्ड) भङ्क्तवान्, येन प्रथमवारं १९५२ तमस्य वर्षस्य मई-मासस्य १३ दिनाङ्के निर्वाचितप्रधानमन्त्रिरूपेण शपथः गृहीतः आसीत्, स च १९६४ तमस्य वर्षस्य मई-मासस्य २७ दिनाङ्कं यावत् पदे आसीत्। निर्वाचितप्रधान-मन्त्रिरूपेण पण्डितनेहरुवर्यस्य कार्यकालः ४३९८ दिनानां आसीत्। २०१४ तमस्य वर्षस्य मई-मासस्य २६ दिनाङ्कतः अद्य २०२६ तमस्य वर्षस्य जून-मासस्य १० दिनाङ्कं यावत्, प्रधानमन्त्री मोदीवर्यस्य निरन्तरः कार्यकालः अधुना ४३९९ दिनानां जातः, येन सः भारतस्य इतिहासे दीर्घतमावधिं यावत् सेवां कृतवान् निर्वाचितः प्रधानमन्त्री अभवत्।